শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে

# ॥ ত্রযোৱিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ ত্রযোৱিংশঃ সর্গঃ ॥

## রাক্ষসীভিঃ সীতাযাঃ প্রবোধনম্

ইত্যুক্ত্বা মৈথিলীং রাজা রাৱণঃ শত্রুরাৱণঃ।
সন্দিশ্য চ ততঃ সর্ৱা রাক্ষসীর্নির্জগাম হ॥ **5.23.1** ॥

নিষ্ক্রান্তে রাক্ষসেন্দ্রে তু পুনরন্তঃপুরং গতে।
রাক্ষস্যো ভীমরূপাস্তাঃ সীতাং সমভিদুদ্রুৱুঃ॥ **5.23.2** ॥

ততঃ সীতামুপাগম্য রাক্ষস্যঃ ক্রোধমূর্ছিতাঃ।
পরং পরুষযা ৱাচা ৱৈদেহীমিদমব্রুৱন্॥ **5.23.3** ॥

পৌলস্ত্যস্য ৱরিষ্ঠস্য রাৱণস্য মহাত্মনঃ।
দশগ্রীৱস্য ভার্যাৎৱং সীতে ন বহু মন্যসে॥ **5.23.4** ॥

ততস্ত্বেকজটা নাম রাক্ষসী ৱাক্যমব্রৱীৎ।
আমন্ত্র্য ক্রোধতাম্রাক্ষী সীতাং করতলোদরীম্॥ **5.23.5** ॥

প্রজাপতীনাং ষণ্ণাং তু চতুর্থোঽযং প্রজাপতিঃ।
মানসো ব্রহ্মণঃ পুত্রঃ পুলস্ত্য ইতি ৱিশ্রুতঃ॥ **5.23.6** ॥

পুলস্ত্যস্য তু তেজস্ৱী মহর্ষির্মানসঃ সুতঃ।
নাম্না স ৱিশ্রৱা নাম প্রজাপতিসমপ্রভঃ॥ **5.23.7** ॥

তস্য পুত্রো ৱিশালাক্ষি রাৱণঃ শত্রুরাৱণঃ।
তস্য ৎৱং রাক্ষসেন্দ্রস্য ভার্যা ভৱিতুমর্হসি॥ **5.23.8** ॥

ময়োক্তং চারুসর্ৱাঙ্গি ৱাক্যং কিং নানুমন্যসে।
ততো হরিজটা নাম রাক্ষসী ৱাক্যমব্রৱীৎ॥ **5.23.9** ॥

ৱিৱৃত্য নয়নে কোপান্মার্জারসদৃশেক্ষণা।
যেন দেৱাস্ত্রয়স্ত্রিংশদ্ দেৱরাজশ্চ নির্জিতঃ॥ **5.23.10** ॥

তস্য ৎৱং রাক্ষসেন্দ্রস্য ভার্যা ভৱিতুমর্হসি।
ৱীর্যোৎসিক্তস্য শূরস্য সঙ্গ্রামেষ্ৱনিৱর্তিনঃ।
বলিনো ৱীর্যযুক্তস্য ভার্যা ৎৱং কিং ন লিপ্সসে॥ **5.23.11** ॥

প্রিয়াং বহুমতাং ভার্যাং ত্যক্ত্বা রাজা মহাবলঃ।
সর্ৱাসাং চ মহাভাগাং ৎৱামুপৈষ্যতি রাৱণঃ॥ **5.23.12** ॥

সমৃদ্ধং স্ত্রীসহস্রেণ নানারত্নোপশোভিতম্।
অন্তঃপুরং তদুৎসৃজ্য ৎৱামুপৈষ্যতি রাৱণঃ॥ **5.23.13** ॥

অন্যা তু ৱিকটা নাম রাক্ষসী ৱাক্যমব্রৱীৎ।
অসকৃদ্ ভীমৱীর্যেণ নাগা গন্ধর্ৱদানৱাঃ।
নির্জিতাঃ সমরে যেন স তে পার্শ্ৱমুপাগতঃ॥ **5.23.14** ॥

তস্য সর্ৱসমৃদ্ধস্য রাৱণস্য মহাত্মনঃ।
কিমর্থং রাক্ষসেন্দ্রস্য ভার্যাৎৱং নেচ্ছসেঽধমে॥ **5.23.15** ॥

ততস্তাং দুর্মুখী নাম রাক্ষসী ৱাক্যমব্রৱীৎ।
যস্য সূর্যো ন তপতি ভীতো যস্য স মারুতঃ।
ন ৱাতি স্মায়তাপাঙ্গি কিং ৎৱং তস্য ন তিষ্ঠসে॥ **5.23.16** ॥

পুষ্পৱৃষ্টিং চ তরৱো মুমুচুর্যস্য ৱৈ ভয়াৎ।
শৈলাঃ সুস্রুৱুঃ পানীয়ং জলদাশ্চ যদেচ্ছতি॥ **5.23.17** ॥

তস্য নৈরৃতরাজস্য রাজরাজস্য ভামিনি।
কিং ৎৱং ন কুরুষে বুদ্ধিং ভার্যার্থে রাৱণস্য হি॥ **5.23.18**॥

সাধু তে তত্ত্বতো দেৱি কথিতং সাধু ভামিনি।
গৃহাণ সুস্মিতে ৱাক্যমন্যথা ন ভৱিষ্যসি॥ **5.23.19**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে ত্রযোৱিংশঃ সর্গঃ ॥